# shrIj nAnasarasvatI(bAsara) bhaktidhArAstotram

# શ્રીજ્ઞાનસરસ્વતી(બાસર) ભક્તિધારાસ્તોત્રમ્

## Document Information

Text title : sarasvatIbhaktidhArAstotram

File name : sarasvatIbhaktidhArAstotram.itx

Category : devii, sarasvatI, devI

Location : doc_devii

Author : Ramadas

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada, PSA Easwaran

Latest update : January 4, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીજ્ઞાનસરસ્વતી(બાસર) ભક્તિધારાસ્તોત્રમ્

વિહિતનમસ્કારશરણ્યાં સુખપ્રદાં
  ૐકારપૂરિતનામાર્ચનાં શુભપ્રદામ્ ।
પુરસ્કારસહિતદર્શનાં ફલપ્રદાં
  બાસરક્ષેત્રદેવીં ભજ સરસ્વતીં માતરમ્ ॥ ૧॥
પઞ્ચામૃતાભિષેકેન કામિતફલદાયિકાં
  નૈવેદ્યનિવેદનેન સકલાર્થસાધિકામ્ ।
નીરાજનદર્શનેન સકલાર્થસાધિકાં
  બાસરક્ષેત્રદેવીં ભજ સરસ્વતીં માતરમ્ ॥ ૨॥
તવ પાદાબ્જસ્પર્શનં પાપહરણં
  તવ કટાક્ષવીક્ષણં રોગનિવારણમ્ ।
તવ મન્ત્રાક્ષતરક્ષણં શુભકરં
  બાસરક્ષેત્રદેવીં ભજ સરસ્વતીં માતરમ્ ॥ ૩॥
નમોઽસ્તુ વેદવ્યાસનિર્મિતપ્રતિષ્ઠિતાયૈ
  નમોઽસ્તુ મહાલક્ષ્મીમહાકાળીસમેતાયૈ ।
નમોઽસ્તુ અષ્ટતીર્થજલમહિમાન્વિતાયૈ
  નમોઽસ્તુ બાસરક્ષેત્રે વિલસિતાયૈ ॥ ૪॥
નમોઽસ્તુ ગોદાવરીતટનિવાસિન્યૈ
  નમોઽસ્તુ કૃપાકટાક્ષસ્વરૂપાયૈ ।
નમોઽસ્તુ સ્મૃતિમાત્રપ્રસન્નાયૈ
  નમોઽસ્તુ બાસરક્ષેત્રે વિલસિતાયૈ ॥ ૫॥
નમોઽસ્તુ મનોહરપુષ્પાલઙ્કૃતાયૈ
  નમોઽસ્તુ જ્ઞાનમૂલાયૈ જ્ઞાનગમ્યાયૈ ।
નમોઽસ્તુ ગુરુભક્તિરહસ્યપ્રકટિતાયૈ
  નમોઽસ્તુ બાસરક્ષેત્રે વિલસિતાયૈ ॥ ૬॥
નમોઽસ્તુ મણ્ડલદીક્ષાભિક્ષામહાદાત્ર્યૈ

નમોઽસ્તુ મહામન્ત્રતન્ત્રપ્રવીણાયૈ ।
નમોઽસ્તુ સહસ્રારચક્રનિલયાયૈ
નમોઽસ્તુ બાસરક્ષેત્રે વિલસિતાયૈ ॥ ૭॥
નમોઽસ્તુ સર્વપાપસંહારિકાયૈ
નમોઽસ્તુ યોગિયોગિનીગણસંસેવિતાયૈ ।
નમોઽસ્તુ સકલકલ્યાણશુભદાયૈ
નમોઽસ્તુ બાસરક્ષેત્રે વિલસિતાયૈ ॥ ૮॥
રામદાસેન વિરચિતમિદં પઠતે ભક્તિમાન્નરઃ
વિદ્યાં શ્રેયો વિપુલસૌખ્યં પ્રાપ્નોતિ ॥

Encoded by Malleswara Rao Yellapragada malleswararaoy at yahoo.com
Proofread by Malleswara Rao Yellapragada, PSA Easwaran

---

*shrIj nAnasarasvatI(bAsara) bhaktidhArAstotram*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*